श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## वेणु गीत



सुध बुध खोकर हुई बावरी, सुन मुरली की मधुर तान।
कृष्ण मिलन की आशा प्रकटी, ऐसा निर्मल वेणु गान ।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्**

**nārāyaṇaṃ(n) namaskṛtya, naraṃ(ñ)caiva narottamam**
**devīṃ(m) sarasvatīṃ(m) vyāsaṃ(n), tato jayamudīrayet**

**नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्**

**nāmasaṅkīrtanaṃ(m) yasya, sarvapāpapraṇāśanam**
**praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param**

**श्रीमद्भागवतमहापुराणम्**

**दशमः स्कन्धः**

**॥ अथैकविंशोऽध्यायः ॥**

**Śrīmadabhāgavatamahāpurāṇama**

**daśmaḥ skandhaḥ**

**athaikaviṃśo'dhyayaḥ**

### श्रीशुक उवाच

**इत्थं(म्) शरत्स्वच्छजलं(म्), पद्माकरसुगन्धिना ।**
**न्यविशद् वायुना वातं(म्), सगोगोपालकोऽच्युतः ॥ 1॥**

śrīśuka uvāca

itthaṃ(m) śaratsvacchajalaṃ(m), padmākarasugandhinā .

nyaviśad vāyunā vātaṃ(m), sagogopālako'cyutaḥ .. 1..

śarat+ svaccha+ jalaṃ(m), sago+ gopā+ lako'cyutaḥ

कुसुमितवनराजिशुष्मिभृं(ङ्)ग-

द्विजकुलघुष्टसरः(स्)सरिन्महीध्रम् ।

मधुपतिरवगाह्य चारयन् गाः(स्),

सहपशुपालबलश्चुकूज वेणुम् ॥ 2॥

kusumitavanarājiśuṣmibhṛṅ(ṅ)ga-

dvijakulaghuṣṭasaraḥ(s)sarinmahīdhram .

madhupatiravagāhya cārayan gāḥ(s)

sahapaśupālabalaścukūja veṇum .. 2..

kusumi+ tavanarā+ jiśuṣmi + bhṛṅ(ṅ)ga, dvijaku+ laghuṣṭa+ saraḥ(s)sarin+ mahīdhram,
madhupati+ ravagāhya, sahapaśupā + labalaś + cukūja

तद् व्रजस्त्रिय आश्रुत्य, वेणुगीतं(म्) स्मरोदयम् ।

काश्चित् परोक्षं(ङ्) कृष्णस्य, स्वसखीभ्योऽन्ववर्णयन् ॥ 3॥

tad vrajastriya āśrutya, veṇugītaṃ(m) smarodayam .

kāścit parokṣaṃ(ṅ) kṛṣṇasya, svasakhībhyo'nvavarṇayan .. 3..

svasakhī+ bhyo'n+ vavarṇayan

तद् वर्णयितुमारब्धाः(स्), स्मरन्त्यः(ख्) कृष्णचेष्टितम् ।

नाशकन् स्मरवेगेन, विक्षिप्तमनसो नृप ॥ 4॥

tad varṇayitumārabdhāḥ(s), smarantyaḥ(kh) kṛṣṇaceṣṭitam .

nāśakan smaravegena, vikṣiptamanaso nṛpa .. 4..

varṇa+ yitumā+ rabdhāḥ(s), kṛṣṇa+ ceṣṭitam, sma+ ravegena, vikṣip + tamanaso

बर्हापीडं(न्) नटवरवपुः(ख्) कर्णयोः(ख्) कर्णिकारं(म्),
बिभ्रद् वासः(ख्) कनककपिशं(म्) वैजयन्तीं(ञ्) च मालाम् ।
रन्ध्रान् वेणोरधरसुधया पूरयन् गोपवृन्दैर्-
वृन्दारण्यं(म्) स्वपदरमणं(म्) प्राविशद् गीतकीर्तिः ॥ 5॥

**barhāpīḍaṃ(n) naṭavaravapuḥ(kh) karṇayoḥ(kh) karṇikāraṃ(m)**
**bibhrad vāsaḥ(kh) kanakakapiśaṃ(m) vaijayantīṃ(ñ) ca mālām .**
**randhrān veṇoradharasudhayā pūrayan gopavṛndair-**
**vṛndāraṇyaṃ(m) svapadaramaṇaṃ(m) prāviśad gītakīrtiḥ .. 5..**

bibhrad+ vā**s**a**ḥ**(kh), ve**ṇ**o+ radha+ rasudhay**ā**

इति वेणुरवं(म्) राजन्, सर्वभूतमनोहरम् ।
श्रुत्वा व्रजस्त्रियः(स्) सर्वा, वर्णयन्त्योऽभिरेभिरे ॥ 6॥

**iti veṇuravaṃ(m) rājan, sarvabhūtamanoharam .**
**śrutvā vrajastriyaḥ(s) sarvā, varṇayantyo'bhirebhire .. 6..**

var**ṇ**a+ yantyo'+ bhirebhire

गोप्य ऊचुः
अक्षण्वतां(म्) फलमिदं(न्) न परं(म्) विदामः(स्),
सख्यः(फ्) पशूननु विवेशयतोर्वयस्यैः ।
वक्त्रं(म्) व्रजेशसुतयोरनुवेणु जुष्टं(म्),
यैर्वा निपीतमनुरक्तकटाक्षमोक्षम् ॥ 7॥

**gopya ūcuḥ**
**akṣaṇvatāṃ(m) phalamidaṃ(n) na paraṃ(m) vidāmaḥ(s)**
**sakhyaḥ(ph) paśūnanu viveśayatorvayasyaiḥ .**
**vaktraṃ(m) vrajeśasutayoranuveṇu juṣṭaṃ(m),**
**yairvā nipītamanuraktakaṭākṣamokṣam .. 7..**

akṣaṇ+ vatāṃ(m), vive+ śayator+ vayasyaiḥ, vraje+ śasutayo+ ranuveṇu,

nipī+ tamanurakta+ kaṭākṣamokṣam

**चूतप्रवालबर्हस्तबकोत्पलाब्ज-**

**मालानुपृक्तपरिधानविचित्रवेषौ ।**

**मध्ये विरेजतुरलं(म्) पशुपालगोष्ठ्यां(म्),**

**रं(ङ्)गे यथा नटवरौ क्व च गायमानौ ॥ 8॥**

**cūtapravālabarhastabakotpalābja-**

**mālānupṛktaparidhānavicitraveṣau .**

**madhye virejaturalaṃ(m) paśupālagoṣṭhyāṃ(m)**

**raṅ(ṅ)ge yathā naṭavarau kva ca gāyamānau .. 8..**

cūta+ pravā+ labarhas+ taba+ kot+ palābja,

mālā+ nupṛkta+ paridhā+ navicitra+ veṣau

paśupā+ lagoṣṭhyāṃ(m)

**गोप्यः(ख्) किमाचरदयं(ङ्) कुशलं(म्) स्म वेणुर्-**

**दामोदराधरसुधामपि गोपिकानाम् ।**

**भुङ्क्ते स्वयं(म्) यदवशिष्टरसं(म्) ह्रदिन्यो,**

**हृष्यत्त्वचोऽश्रुमुमुचुस्तरवो यथाऽऽर्याः ॥ 9॥**

**gopyaḥ(kh) kimācaradayaṃ(ṅ) kuśalaṃ(m) sma veṇur-**

**dāmodarādharasudhāmapi gopikānām .**

**bhuṅkte svayaṃ(m) yadavaśiṣṭarasaṃ(m) hradinyo**

**hṛṣyattvaco'śrumumucustaravo yathā''ryaḥ .. 9..**

kimā+ caradayaṃ(ṅ), dāmodarā+ dharasudhā+ mapi,

yadava+ śiṣṭarasaṃ(m)

hṛṣyat+ tvaco'+ śrumumucus+ taravo

**वृन्दावनं(म्) सखि भुवो वितनोति कीर्तिं(म्),**

**यद् देवकीसुतपदाम्बुजलब्धलक्ष्मि ।**

**गोविन्दवेणुमनु मत्तमयूरनृत्यं(म्),**

**प्रेक्ष्याद्रिसान्वपरतान्यसमस्तसत्त्वम् ॥ 10॥**

**vṛndāvanaṃ(m) sakhi bhuvo vitanoti kīrtiṃ(m),**

**yad devakīsutapadāmbujalabdhalakṣmi .**

**govindaveṇumanu mattamayūranṛtyaṃ(m)**

**prekṣyādrisānvaparatānyasamastasattvam .. 10..**

devak**ī+** sutapad**ā**m+ bujalabdha+ lak**ṣ**mi, mat+ tamay**ū+** ran**ṛ**tya**ṃ**(m)

prek**ṣ**y**ā+** dris**ā**n + vaparat**ā**n+ yasamas + tasattvam

**धन्याः(स्) स्म मूढमतयोऽपि हरिण्य एता,**

**या नन्दनन्दनमुपात्तविचित्रवेषम् ।**

**आकर्ण्य वेणुरणितं(म्) सहकृष्णसाराः(फ्),**

**पूजां(न्) दधुर्विरचितां(म्) प्रणयावलोकैः ॥ 11॥**

**dhanyāḥ(s) sma mūḍhamatayo'pi hariṇya etā**

**yā nandanandanamupāttavicitraveṣam .**

**ākarṇya veṇuraṇitaṃ(m) sahakṛṣṇasārāḥ(ph)**

**pūjāṃ(n) dadhurviracitāṃ(m) praṇayāvalokaiḥ .. 11..**

m**ūḍ**ha+ matayo'pi, nandananda+ namup**ā**t + tavicitrave**ṣ**am

ve**ṇ**u+ ra**ṇ**ita**ṃ**(m), dadhur+ viracit**āṃ**(m), pra**ṇ**ay**ā** **+** valokai**ḥ**

**कृष्णं(न्) निरीक्ष्य वनितोत्सवरूपशीलं(म्),**

**श्रुत्वा च तत्क्वणितवेणुविचित्रगीतम् ।**

**देव्यो विमानगतयः(स्) स्मरनुन्नसारा,**

**भ्रश्यत्प्रसूनकबरा मुमुहुर्विनीव्यः ॥ 12॥**

kṛṣṇaṃ(n) nirīkṣya vanitotsavarūpaśīlaṃ(m)

śrutvā ca tatkvaṇitaveṇuvicitragītam .

devyo vimānagatayaḥ(s) smaranunnasārā

bhraśyatprasūnakabarā mumuhurvinīvyaḥ .. 12..

vanitot+ savarū+ paśīlaṃ(m), tat+ kvaṇi+ tave+ ṇuvicitragītam ,vimā+ nagatayaḥ(s),

smaranun+ nasārā, bhraśyat+ prasū+ nakabarā, mumuhur+ vinīvyaḥ

गावश्च कृष्णमुखनिर्गतवेणुगीत-

पीयूषमुत्तभितकर्णपुटैः(फ्) पिबन्त्यः ।

शावाः(स्) स्नुतस्तनपयः(ख्)कवलाः(स्) स्म तस्थुर्-

गोविन्दमात्मनि दृशाश्रुकलाः(स्) स्पृशन्त्यः ॥ 13॥

gāvaśca kṛṣṇamukhanirgataveṇugīta-

pīyūṣamuttabhitakarṇapuṭaiḥ(ph) pibantyaḥ .

śāvāḥ(s) snutastanapayaḥ(kh)kavalāḥ(s) sma tasthur-

govindamātmani dṛśāśrukalāḥ(s) spṛśantyaḥ .. 13..

kṛṣṇamukha+ nirgata+ veṇugīta, pīyū+ ṣamuttabhita+ karṇapuṭaiḥ(ph)

snutas+ tanapayaḥ(kh), govin+ damātmani, dṛśā+ śrukalāḥ(s)

प्रायो बताम्ब विहगा मुनयो वनेऽस्मिन्,

कृष्णेक्षितं(न्) तदुदितं(ङ्) कलवेणुगीतम् ।

आरुह्य ये द्रुमभुजान् रुचिरप्रवालान्,

शृण्वन्त्यमीलितदृशो विगतान्यवाचः ॥ 14।

prāyo batāmba vihagā munayo vane'smin

kṛṣṇekṣitaṃ(n) taduditaṃ(ṅ) kalaveṇugītam .

āruhya ye drumabhujān rucirapravālān

śṛṇvantyamīlitadṛśo vigatānyavācaḥ .. 14.

rucira+ pravālān, śṛṇvantya+ mīli+ tadṛśo, vigatān+ yavācaḥ

नद्यस्तदा तदुपधार्य मुकुन्दगीत-
मावर्तलक्षितमनोभवभग्नवेगाः ।
आलिं(ङ्)गनस्थगितमूर्मिभुजैर्मुरारेर्-
गृह्णन्ति पादयुगलं(ङ्) कमलोपहाराः ॥ 15॥

**nadyastadā tadupadhārya mukundagīta-**
**māvartalakṣitamanobhavabhagnavegāḥ .**
**āliṅ(ṅ)ganasthagitamūrmibhujairmurārer**
**gṛhṇanti pādayugalaṃ(ṅ) kamalopahārāḥ .. 15..**

tadu+ padhārya, māvar+ talakṣi+ tamano+ bhavabhag+ navegāḥ

āliṅ(ṅ)ganas+ thagitamūr+ mibhujair+ murārer,

kamalo+ pahārāḥ

दृष्ट्वाऽऽतपे व्रजपशून् सह रामगोपैः(स्),
सं(ञ्)चारयन्तमनु वेणुमुदीरयन्तम् ।
प्रेमप्रवृद्ध उदितः(ख्) कुसुमावलीभिः(स्),
सख्युर्व्यधात् स्ववपुषाम्बुद आतपत्रम् ॥ 16॥

**dṛṣṭvā''tape vrajapaśūn saha rāmagopaiḥ(s)**
**sañ(ñ)cārayantamanu veṇumudīrayantam .**
**premapravṛddha uditaḥ(kh) kusumāvalībhiḥ(s)**
**sakhyurvyadhāt svavapuṣāmbuda ātapatram .. 16..**

sañ(ñ)cā+ rayan+ tamanu, veṇumudī+ rayantam,

kusumā+ valībhiḥ(s)

sakhyur+ vyadhāt, sva+ vapuṣām+ buda

पूर्णाः(फ्) पुलिन्द्य उरुगायपदाब्जराग-

श्रीकुं(ङ्)कुमेन दयितास्तनमण्डितेन ।

तद्दर्शनस्मररुजस्तृणरूषितेन,

लिम्पन्त्य आननकुचेषु जहुस्तदाधिम् ॥ 17॥

pūrṇāḥ(ph) pulindya urugāyapadābjarāga-

śrīkuṃ(ṅ)kumena dayitāstanamaṇḍitena .

taddarśanasmararujastṛṇarūṣitena

limpantya ānanakuceṣu jahustadādhim .. 17..

urugā+ yapadāb+ jarāga, dayitās+ tana+ maṇḍitena

taddarśanas+ mararujas+ tṛṇarūṣitena, jahus+ tadādhim

हन्तायमद्रिरबला हरिदासवर्यो,

यद् रामकृष्णचरणस्पर्शप्रमोदः ।

मानं(न्) तनोति सहगोगणयोस्तयोर्यत्,

पानीयसूयवसकन्दरकन्दमूलैः ॥ 18॥

hantāyamadrirabalā haridāsavaryo

yad rāmakṛṣṇacaraṇasparśapramodaḥ .

mānaṃ(n) tanoti sahagogaṇayostayoryat

pānīyasūyavasakandarakandamūlaiḥ .. 18..

hanta+ yamadri+ rabalā, rāmakṛṣṇacaraṇa+ sparśapramodaḥ

sahago+ gaṇayos+ tayoryat, pānīyasū+ yavasakan+ darakan+ damūlaiḥ

गा गोपकैरनुवनं(न्) नयतोरुदार-

वेणुस्वनैः(ख्) कलपदैस्तनुभृत्सु सख्यः ।

अस्पन्दनं(ङ्) गतिमतां(म्) पुलकस्तरूणां(न्),

निर्योगपाशकृतलक्षणयोर्विचित्रम् ॥ 19॥

gā gopakairanuvanaṃ(n) nayatorudāra-

veṇusvanaiḥ(kh) kalapadaistanubhṛtsu sakhyaḥ .

aspandanaṃ(ṅ) gatimatāṃ(m) pulakastarūṇāṃ(n)

niryogapāśakṛtalakṣaṇayorvicitram .. 19..

gopakai+ ranuvanaṃ(n), kala+ padais+ tanubhṛtsu

pulakas+ tarūṇāṃ(n), niryo+ gapāśakṛtala+ kṣaṇayor+ vicitram

एवं(व्)विधा भगवतो, या वृन्दावनचारिणः ।

वर्णयन्त्यो मिथो गोप्यः(ख्), क्रीडास्तन्मयतां(म्) ययुः ॥ 20॥

evaṃ(v) vidhā bhagavato, yā vṛndāvanacāriṇaḥ .

varṇayantyo mitho gopyaḥ(kh), krīḍāstanmayatāṃ(m) yayuḥ .. 20..

varṇa+ yantyo, krīḍās+ tanmayatāṃ(m)

इति श्रीमद्भागवते महापुराणे पारमहंस्यां(म्) संहितायां(न्)

दशमस्कन्धे पूर्वार्धे वेणुगीतं(न्) नामैकविंशोऽध्यायः ॥

iti śrīmadbhāgavate mahāpurāṇe pāramahaṃsyāṃ(m) saṃhitāyāṃ(n)

daśamaskandhe pūrvārdhe veṇugītaṃ(n) nāmaikaviṃśo'dhyāyaḥ .. 21..

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।

ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇatPūrṇamudacyate|

Pūrṇasya Pūrṇamādāya Pūrṇamevāvashiṣyate ||

Om Shāntih(ś) Shāntih(ś) Shāntih ||

